# || सुदर्श नचक्र स्तोत्र ||

नमः सुदर्शनायैव सहस्रादित्यवर्चसे ।

ज्वाला माला प्रदीप्ताय सहस्राराय चक्षुषे ॥

सर्व दुष्ट विनाशाय सर्व पात कमर्दिने ।

सुचक्राय विचक्राय सर्व मन्त्रविभेदिने ॥

प्रसवित्रे जगद्धात्रे जगद्विध्वंसिने नमः ।

पालनार्थाय लोकानां दुष्टासुर विनाशिने ॥

उग्राय चैव सौम्याय चण्डाय च नमो नमः ।

नमश्चक्षुःस्वरुपाय संसार भय भेदिने ॥

मायापञ्जर भेत्रे च शिवाय च नमोनमः ।

ग्रहातिग्रह-रुपाय ग्रहाणां पतये नमः ॥

कालाय मृत्यवे चैव भीमाय च नमोनमः ॥

भक्तानुग्रहदात्रे च भक्त गोप्त्रे नमो नमः ।

विष्णुरुपाय शान्ताय चायुधानां धराय च ॥

विष्णु शस्त्राय चक्राय नमो भूयो नमो नमः ।

इति स्तोत्रं महत्पुण्यं चक्रस्य तव कीर्तितम् ॥

यः पठेत् परया भक्त्या विष्णुलोकं स गच्छति ।

चक्र पूजाविधिं यश्च पठेद्रुद्र जितेन्द्रियः ।

स पापं भस्मसात्कृत्वा विष्णुलोकाय कल्पते ॥

॥ इति श्रीगरुडपुराणे सुदर्शनचक्र स्तोत्रं संपूर्णम् ॥